सुधर्मा

SUDHARMA - THE ONLY SANSKRUTA DAILY

सुधर्मा .२९॥०१॥२०१२

## पूज्याः दयानन्दसरस्वतीस्वामिनः

अस्माकं देशस्य कालस्य च महान्तः चिन्तनकाराः दार्शनिकाः बोधकाः लेखकाश्च सन्ति पूज्याः श्री दयानन्दसरस्वती स्वामिपादाः। तेषां परिचयं कारयितुं प्रयत्नः क्रियतेऽत्र हिमालयस्येव सागरस्येव ब्रह्माण्डस्येव श्री स्वामिपादानां परिचयोऽपि कर्तुं वा कारयितुं वा न सुलभः। कावेरिनद्याः तीरे स्थिते मञ्जकुडिनाम्निग्रामे संजातः कश्चन शिशुः वेदान्तस्य श्रेष्ठः प्रवक्ता आध्यात्ममार्गस्य दर्शयिता उत्तमोत्तमो व्याख्याता अभवदिति विस्मयस्थानम्। क्रियासिद्धिः सत्वे भवति महतां नोपकरणे इत्युक्तेरुदाहरणमत्र पश्यामः। भारतवर्षे स्वामिपादैः मानवकुलस्योद्धाराय आर्षविध्या गुरुकुलं प्रतिष्ठापितं यस्य शाखाः अमेरिकादिदेशेष्वपि विलसन्ति। श्री दयानन्दसरस्वतीस्वामिनां शिष्या विश्वस्मिन् सर्वत्र विराजन्ते। विश्वसंस्थायाम् अपि सदस्यान् उद्दिश्य श्रिर् स्वामिनो वेदान्तोपन्यासं कृत्वन्तः। तेषां सिद्धीनां सर्वासां गणनां कर्तुम् आदिशेष एव प्रभवेत्।

आदिशङ्कराचार्य परम्पराम् आश्रित्याहं वेदान्तं बोधयामीति वदन्ति पूज्याः दयानन्दस्वामिपादाः। यदा स्वामिपादाः भाषन्ते तदा श्रोतारो मन्त्रमुग्धा भवन्ति। वेदान्तस्य क्लिष्टतमा अपि विचाराः तद्भाषणश्रवणात् स्पष्टतमा भवन्ति। तेषां शैली प्रसन्ना। तल्लिखितं सदा प्रसन्नम्। गम्भीरं च। प्रायः आदिशङ्करादनन्तरं दयाबोधको नन्दसरस्वतीसदृशो वेदान्तबोधको नोदपद्यत भूतले। वदन्ति स्वामिपादाः एक एव देवोऽस्तीति न। देव एक एवास्ति विश्वस्मिन्। तत्र यदस्ति तत्सर्वम् ईश्वर एव। इति। प्राचीनैम्र्जिर्नभिः प्रोक्तम् एव सत्यं नूतनैर्वचोभिः विवृण्वन्ति स्वामिपादाः।
श्री दयानन्दसरस्वतीस्वामिनो गुरूणां गुरवः। सर्वेषां वयसां जनाः सर्वासां संस्कृतीनां प्रतिनिधयः तद्वचांसि श्रोतुमिच्छन्ति। सर्वाः संस्कृतयः सभ्यताश्च प्रिरक्षणीया इति स्वामिचरणानाम् आशयः। मतविषये कदापि आक्रमणकारिता। नोचिता इति ते प्रतिपादयन्ति। १९९९ वर्षे हिन्दुधर्माचार्यसभाम् आयोज्य दयानन्दसरस्वतीस्वामिचरणाः ऐतिहासिकं कार्यम् अगुर्वन्। मौल्याधारितं शिक्षणं सर्वत्र कल्पयितुं च ते प्रयतन्ते। स्वामिदयानन्दशिक्षणन्यासे न चाल्यमानासु शालासु नानाग्रामाणां बालका विध्यार्जनं कुर्वन्ति।

वेदसंस्कृतेः श्रीमत्वस्य ज्ञान प्रसारयितुं हिन्दुधर्मरक्षणसमितिः श्रीस्वामिचरणैः स्थापिता। विश्वशान्तेः कृते धर्माणां मैत्र्याः कृते च सनातनधर्मस्य सबलुपस्थितिरनिवार्येति स्वामिचरणानां भावना।

श्रीदयानन्दसरस्वतीस्वामिनां संगीतेऽपि महती आसक्तिरस्ति। सरलसंस्कृते बह्वयः कृतयः तैर्विरचिताः। कर्णाटकशात्रीय संगीतस्य सेवां कृतवद्भ्यो महद्भ्यः आर्षकलाभूषणम् इति प्रशातिं प्रदातुं स्वामिचरणाः वयूवस्थां कृतवन्तः। एतावत्पर्यन्तं त्रयोदश श्रेष्ठाः संगीतकाराः प्रशस्तिम् अलभन्त।

एवं मानवकुलस्य सर्वतोमुख्यै अभिवृद्धयै सततं प्रयतमानानां श्रीदयानन्दसरस्वतीस्वामिनां भगवद्गीता व्याख्यानं सम्प्रति कन्नड भाषायाम् अपि लभ्यते इति अस्माकं कन्नडभाषिणां महतः प्रमोदस्य विषयः।

विद्वान् एच् वि नागराजराव्